Gyanvividha, Vol.-2; Issue-4 (Oct.-Dec.) 2025 : PP-190-193

ज्ञानविविधा

कला, मानविकी और सामाजिक विज्ञान की सहकर्मी-समीक्षित, मूल्यांकित, त्रैमासिक शोध पत्रिका

ISSN : 3048-4537(Online)
3049-2327(Print)
IIFS Impact Factor-2.25
Vol.-2; Issue-4 (Oct.-Dec.) 2025
Page No.-190-193
©2025 Gyanvividha
https://journal.gyanvividha.com

**Author's :**

**रविरंजनकुमारझाः**
गवेषकः, स्नातकोत्तरव्याकरणविभागः,
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः,
कामेश्वरनगरम्, दरभङ्गा.

Corresponding Author :

**रविरंजनकुमारझाः**
गवेषकः, स्नातकोत्तरव्याकरणविभागः,
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः,
कामेश्वरनगरम्, दरभङ्गा.

# अधिपाणिनिसारस्वतव्याकरणं स्त्रीप्रत्ययविधायकसूत्राणां समीक्षणम्

**सारांश-** महर्षि पाणिनि के द्वारा रचित व्याकरण सर्वोत्कृष्ट व्याकरण है। यहां शब्दों का उत्कृष्ट संग्रह और उसके प्रकृति प्रत्यय का विधान देखा जाता है। प्रत्यय विधान के अंतर्गत तीनों लिंगों के शब्दों का संकलन देखा गया है। यहां स्त्री प्रत्यय के संदर्भ में कतिपय सूत्र प्रसिद्ध हैं। स्त्री प्रत्यय के निरुपण में सारस्वतव्याकरणकार  की सूत्र संरचना अत्यधिक अद्भुत है। वह तीन चार प्रत्ययों के अंतर्गत समस्त प्रत्ययों को अंतर्भाव करने का प्रयत्न किए हैं। यहां  लाघव की दृष्टि से यह प्रयत्न आदरणीय है तो शब्द संग्रह की दृष्टि से उतना उचित नहीं है। महर्षि पाणिनि ने भी सूत्रों के द्वारा जो संकलन किया है वहां वार्तिकों का संशोधन देखा गया है। सूत्र स्वरुप की दृष्टि से सारस्वत व्याकरण का सूत्र लाघव को प्रदान करता है तो वैज्ञानिक दृष्टि से पाणिनि सूत्र उचिततम प्रसिद्ध होता है।

**कूटशब्दाः-** लोमशः, अपचयः, उपचयः, संस्त्यायनम्, एकलिङ्गत्वं, द्विलिङ्गत्वम्, त्रिलिङ्गत्वम्, सत्वादिधर्मः।।

**विषयप्रस्तावना- वाचामेव प्रसादेन लोकयात्रा प्रवर्तते**[1] इति काव्यादर्शकारस्य वाचिकयात्रां प्रति वाचां यत्कारणत्वन्तत्र कारणा-वच्छेदकत्वानुमाने प्रत्ययानामवदानमपरिच्छिन्नमस्ति। अस्मिन् प्रत्यय-परकयात्राप्रसङ्गे स्त्रीप्रत्ययानाम् उपादेयता लोकतः शास्त्रतश्च प्रासङ्गिकी वर्तते अतः तद्विधायकसूत्राणामालोके पाणिनिसारस्वत-व्याकरणस्थसूत्राणामत्र समीक्षणमुपस्थाप्यतेऽतः अयं विषयः शोधक्रमाङ्गतया समीक्ष्यते – **अधिपाणिनिसारस्वतव्याकरणं स्त्रीप्र-त्ययविधायकसूत्राणां समीक्षणम्**

**विषयोद्देश्यानि -** अस्य समीक्षणाध्ययनस्य अधोलिखितानि  उद्देश्यानि स्पष्टीभविष्यन्त्यनेन समीक्षणेन तथा च –

1. पाणिनिस्त्रीप्रत्ययविधायकसूत्रस्वरुपसमीक्षणम्।
2. सारस्वतव्याकरणकस्त्रीप्रत्ययविधायकसूत्रस्वरुपसमीक्षणम्।
3. तयोः सूत्रयोः स्वरुपं, लघुगुरुविचारस्वरुपसमीक्षणम्।
4. उदाहरणप्रदाने तयोः साम्यवैषम्यसमीक्षणम्।
5. प्रत्ययविधाने अर्थसाङ्गत्यस्वरुपसमीक्षणम्।
6. संक्षेपेण दोषः वा गुणः इत्यस्य विवेचनम्।

उपरि उक्तानि उद्देश्यान्याश्रित्य समीक्षणम् उपस्थाप्यते।

**विषयोपस्थापनम् -** शब्दानुशासने शब्दानां स्वरुपं प्रकृतिप्रत्ययम् अनुशिष्यते। प्रत्ययप्रकरणेषु पदार्थगतं चैतन्यम् अचैतन्यमाश्रित्यस्त्रीप्रत्ययस्य विधानं दृश्यते। अत्र अवयवसंस्थानज्ञाप्यलौकिकालिङ्गस्वरुपम् अस्तीत्थम् –

**स्तनकेशवती स्त्री लोमशः पुरुषः स्मृतः।**
**उभयोनन्तरं यच्च तदभावे नपुंसकम्।।**[2]

अत्र लौकिकलिङ्गमाश्रित्य शास्त्रेषु प्रशक्तिः न भवति। यदि तमाश्रित्य प्रवर्तते तर्हि अचेतनादौ तादृशव्यवहारः न समुपयुज्यते तथा च खट्वेत्यादौ टाबानुपपत्तिः स्यात् अत्र शास्त्रीयं स्वरुपम् -
गुणानामवस्थाः शब्दस्थाः सन्तः तत्त्वं बोधयति, अत्र सत्त्वरजतमसां प्रवृत्तिः उपचयो वा पुंस्त्वं बोधयति, गुणानां संस्त्यायनं चापचयो वा स्त्रीत्वं बोधयति, अत्र साम्यावस्था उभयोः अभावं नपुंसकात्मकं स्वरुपं बोधयति नाम उत्कर्षापकर्षावस्थात्रयमात्रविवक्षायाम् तन्नपुंसकं भवतीत्यर्थः। सन्दर्भेऽस्मिन् भाष्यकाराणां पक्षमाश्रित्य बालमनो-रमाकाराः लिखन्तीत्थम् –

**तदुक्तं भाष्ये – एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वमवयवान्यत्वाच्च इति। एकस्मिन्नेवार्थे पुष्यः , तारकाः, नक्षत्रम् इति शब्दानात्वदर्शनात्, कुटीकुटीरादौ रेफाद्यवयवोपजनने लिङ्गभेददर्शनाच्च स्तनकेशाध्यतिरिक्तमेव लिङ्गमित्यर्थ इति कैयटः। पुँल्लिङ्गः शब्द इत्यादिव्यवहारस्तु वाच्यवाचकयोरभेदोपचाराद्बोध्यः। न च उपचयादिधर्माणां विरुद्धत्वादेकत्र समावेशायोगादेकस्य द्वित्रिलिङ्गताऽनापत्तिरिति वाच्यम्, ऐकेकस्मिन् वस्तुनि क्षणभेदेन त्रयाणां धर्माणमपि समावेशोपपत्तेः। उक्तं च भाष्ये – कश्चिदपि सत्त्वादिधर्मः क्वचिन्मुहूर्तमप नावतिष्ठते, यावदनेन वर्धितव्यमपायेन वा युज्यते, इति। न चैवं सति युगपद् द्वित्रिलिङ्गत्वानापत्तिरिति वाच्यम्, न हि व्यवहारे स्वसमकालिकपदार्थसत्ता प्रयोजिका, तथा सति भूतभविष्यद्यवहारोच्छेदापातात्। तत्र कश्चिच्छब्दः एकलिङ्गविशिष्ट एवार्थे प्रयोज्यः, कश्चित्तु द्विलिङ्गे,कश्चित्तु त्रिलिङ्गे इत्येतत् लिङ्गानु-शासनशास्त्रादवगन्तव्यम्।**

एतावता लौकिकशास्त्रीयलिङ्गानुशासनादिपरिष्कृतानां शब्दानां स्वरुपाबबोधाय पाणिनिसूत्राणि समागतानि तस्मिन् सन्दर्भे सारस्वतसूत्राणामपि स्वरुपाणि सन्ति,अत्र प्रत्ययानुकूलं सूत्रद्वयस्वरुपसमीक्षा समुपस्थाप्यते –

**1. टाप्-** पाणिनिसूत्रे – **“अजाद्यतष्टाप्”**[3] विधानं वर्तते। अस्मात् अजादि-अकारान्तपदवाच्यस्त्रीत्वद्योतनात् **“टाप्”** विधानं सम्पाद्यते तेन अजाखट्वादीनां संगतिः दृश्यते।

अत्र सारस्वते व्याकरणे “**आबतः स्त्रियाम्”**[4] अत्र अकारान्तनाम्नः आप् प्रत्ययस्य विधानम् उपपद्यते। तयोः प्रत्यययोः निष्पन्नोदाहरणानां अपि अवगन्तव्यः तथा च अजा शब्दः टापि पित्स्वरः आबि अपि तथैव भवति परं पाणिनीयपक्षे सारस्वते च “**आ”** एवावशिष्यते। अत्र अकारान्तात् शब्दात् अजादिगणस्य सन्निवेशः अस्ति। सारस्वते

तदर्थं वार्तिकं दृश्यते  अजादेश्चाप् वक्तव्यः इति अत्र द्वयोः भावयोः एकत्रीकृत्य विधानं पाणिनीयतन्त्रेऽस्ति परं सूत्रासंरचनायाम् सारस्वतस्य लाघवत्वं दृश्यते।

अत्र पाणिनीये तन्त्रे डाप् विधानं चाप् विधानं विद्यते। सारस्वते तु न तथास्ति। पाणिनीये शब्दसाधुत्वोपस्थापनं वैज्ञानिकं दृश्यतेऽत्र संक्षेपेण एव प्रशक्तिरस्ति इति।

**2. ङीप् –** पाणिनीये तन्त्रे ङीप् , ङीष्, ङीन् विधानं विद्यतेऽत्र सारस्वते तु इप् विधानं एव अस्ति। सन्दर्भेऽस्मिन् सूत्राणां स्वरुपम् उपस्थाप्यते –

| **क्रमसंङ्ख्या** | **पाणिनीय सूत्रम्** | **सारस्वतम्** | **तयोः उदाहरण्** |
|---|---|---|---|
| 1 | ऋन्नेभ्यो ङीप् – 4.1.4 | नण ईप् -4 | कोष्ट्री,माली |
| 2 | टिड्डाणञ्द्वय.4.1.25 | ष्ट्रप्रियः -6 | कुरुचरी, नदी |
| 3 | टिड्डाणञ्द्वय.4.1.25 | नदादेः -8 | नदी |
| 4 | इन्द्रवरुणभवशर्म.. 4.1.49 | इन्द्रादेः आनीप् -9 | इन्द्राणी |
| 5 | द्विगोः 4.1.21 | ईप समाहारे गुणश्च 10 | त्रिलोकी |
| 6 | पुंयोगादाख्यायाम् -4.1.48 | पुंयोगे च -11 | शूद्री |
| 7 | जातेरस्त्रीविषयादयोपधात् – 4.1.48 | जातेरयोपधात् – 12 | ब्राह्मणी |
| 8 | स्वाङ्गाच्चोपसर्जनात् -4.1.54 | स्वाङ्गाद्वा – 13 | सुमुखी |
| 9 | वृषाकप्याग्नी..-4.1.34 | ऐच मन्वादेः- 14 | वृषाकपायी |
| 10 | वोतो गुणवचनात् – 4.1.44 | वौर्गुणात् - 15 | तन्वी, तनुः |

अत्र उपर्युक्तायां सारण्यां  सारस्वते व्याकरणे ईप् प्रत्ययस्य विधानं विद्यते अत्र पाणिनीये तन्त्रे तु ङीप् , ङीष्,ङीन् विधानम् अस्ति अत्र अन्तर्भावचक्रे तद्रूपम् -

ङाप्,ङीष्,ङीन्

↓

इ, ईप्

विधानदृष्ट्या पाणिनीयव्याकरणशास्त्रस्य वैशिष्ट्यम् अस्ति। अत्र बहुविधानां शब्दानां पार्थक्याय ईकारान्त-त्रयप्रत्ययानाम् उपादानं दृश्यते परं सारस्वते एकस्मात् एव प्रत्ययात् सर्वाणि साधयन्ति इति न समीचीनम् अस्ति। सूत्रनिर्माणदृष्ट्या लाघवस्तु सारस्वते परं तेन शाब्दिकव्यापारस्य संग्रहः न साध्यते।

अत्र सारस्वते एकत्र **आनीप्** विधानम् अस्ति येषां कृते पाणिनीये आगमसाहाय्यम् साध्यते तच्च इन्द्रवरुण सूत्रे द्रष्टव्यम् अस्ति। एवञ्च उभयत्र विचारसाम्यता विद्यते परं सारस्वते तु लघुत्वमादाय प्रयोगनिर्वाहत्वधर्मः समाराध्यते तच्च शासनत्वं न भजते।

**3. ऊङ्प्रत्ययः- "उत ऊ"** इति सूत्रस्वरुपम् आश्रित्य सारस्वते व्याकरमे ऊप्रत्ययस्य विधानं साध्यते। अत्र पाणिनीये तन्त्रे ऊङ् विधानम् अस्ति। अत्र उकारान्तात् एव यदि विधानं  वार्तिकसङ्ख्या- सापेक्ष्यं तर्हि दीर्घोच्चारणस्थं विधानं केवलं शशुरपदात् स्त्रीत्वविधाने ज्ञेयम्। पाणिनीये ङित्-स्वरम् अत्र नहि कश्चित् विभेदः।

तिप्रत्ययः – युवतिपदसाधनाय उभयत्र ति प्रत्ययस्य विधानम् अस्ति। अत्र उभयत्र सूत्रस्वरुपं साम्यतो भजते।

**समीक्षा –** सारस्वतव्याकरणगतानां सूत्राणां यत् स्वरुपम् अस्ति तत् अति संक्षिप्तम्। अत्र संकलनदृष्ट्या पाणिनीये सूत्रे बहूनां शब्दानां सन्निवेशः दृश्यते परम् अत्रापि वार्तिकस्य स्वरुपम् आधिक्येन वर्तते तथा च – **अजाद्यतष्टाप्** सूत्रोपरि **सम्भस्त्राजिनपिण्डेभ्यः फलात्**[5] अपि च **सदच्काण्डप्रान्तशतैकेभ्यः पुस्पात्**[6] **मूलन्नञः**[7] इति अस्ति एवञ्च यदि सांक्षेपिकं स्वरुपं समीक्ष्यते तर्हि सारस्वतव्याकरणसूत्राणां स्वरुपं तदपेक्षय लघुतमम् अस्ति। यदि गणपाठे समेषां संग्रहः कार्यते तर्हि अजाद्यष्टाप् अनेन सूत्रेण एव कार्यसिद्धिः भविष्यति।

अत्र पाणिनीये अर्थमाश्रित्य प्रत्ययविधानम् अपि अस्ति, परमत्र तथा नास्ति। एवञ्च गौरवलाघवदृष्ट्या सूत्रस्वरुपम् अत्र दृश्यते। पाणिनीयतन्त्रे समग्रता अस्ति परमत्रापि तादृशमेव विधानं दृश्यते। एकत्र आनुक् आगमः वर्तते अपरत्र प्रत्ययत्वं धत्ते। "यूनास्ति" इति सूत्रन्यासे साम्यता विद्यते। एतावता इयं समीक्षा समाप्यते इति दिक्।

**सन्दर्भ सूची :**

1. काव्यादर्शः,प्रथमपरिच्छेदः-3.
2. सिद्धान्तकौमुदीटीका बालमनोरमा अजाद्यतष्टाप् उपरि।
3. पाणिनिसूत्रम् – 4.1.8.
4. सारस्वतव्याकरणम् – चौ.सं.प्र., स्त्रीप्रत्ययः सूत्र.सं.1.
5. वा.सं.2419.
6. तथैव, वा.सं.1496.
7. तथैव 2500.

**सन्दर्भग्रन्थसूची :**

1. अष्टाध्यायी,सम्पादकः, डा.नरेश झा, प्रकाशकः- चौखम्बा सुरभारती प्रकाशन, दिल्ली।
2. सारस्वतव्याकरणम्, सम्पादकः-यास्क-श्रीनवकिशोरशास्त्रिणा, प्रकाशकः- चौखम्भा संस्कृत संस्थान, वाराणसी।
3. महाभाष्यम् , सम्पादकः- प्रो.जयशङ्करलालत्रिपाठी, प्रकाशकः -चौखम्बा कृष्णदास अकादमी, वाराणसी।
4. बालमनोरमा, सम्पादकः-डॉ.अर्कनाथचौधरी,प्रकाशकः- चौखम्भा ओरियन्टालिया,दिल्ली।
5. व्याकरणसाहित्येतिहासः- सम्पादक- रामनाथ शास्त्री त्रिपाठी, प्रकाशकः- चौखम्भा पब्लिशर्स, वाराणसी।
6. काव्यादर्शः, सम्पादकः-श्रीरामचन्द्रमिश्रः, प्रकाशकः-चौखम्बा विद्याभव, वाराणसी।

•